**<u>കണ്ണൂർ ജില്ലാ പഞ്ചായത്ത്</u>**

# മുകുളം പരീക്ഷ -2019

## സംസ്കൃതം

ക്ലാസ്സ് 10

സമയം- 90 മിനിറ്റ് ആകെമാർക്ക് 40

---

निर्देशाः

* १५ निमेषाः समाश्वासकालाः ।
* प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लिखत ।
* उत्तरलेखने मूल्याङ्काःकालः च परिगणनीयाः ।
* विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानां उत्तरलेखने देवनाखरीलिपिः उपयोक्तव्या

---

**1. अधोदत्तेषु <u>चतुर्णां</u> प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत ।** 4x1=4

क. विद्वदौषधम् इति प्रसिद्धं काव्यं किम् ?

(नैषधीयचरितम्, कुमारसंभवम्, शिशुपालवधम् )

ख. आरोग्यं केषां श्रेष्ठं भवति ? ( धनानाम्,लाभानाम्,सुखानाम् )

ग. किं गणे न अन्तर्भवति ? ( पचन्,वसन्,आसन् )

घ ." उत्तिष्ठत जाग्रत " इति सूक्तिः कस्मिन् उपनिषदि ?

(मुण्डकोपनिषदि,कठोपनिषदि,तैत्तिरीयोपनिषदि )

ङ. वेदान्तस्य धार्मिकता -इति ग्रन्थस्य कर्ता कः.

(बालगङ्गाधरतिलकः,डो.एस् राधाकृष्णः, महात्मागान्धिः)

**2. यथोचितं योजयत** **4x1 = 4**

| | | |
|---|---|---|
| क. रागविशेषः | -- | ऋग्वेदः |
| ख. गिरिप्रभाषणम् | -- | शानच् प्रत्ययः |
| ग. मधुसूक्तम् | -- | काम्बोजि |
| घ. गम्यमानः | -- | ईशोपदेशः |
| | | शतृप्रत्ययः |

**3-6 अधोदत्तेभ्यः प्रश्नेभ्यः त्रयाणाम् उत्तराणि लिखत- 3x2 =6**

**3. अधोदत्तं वाक्यं पठित्वा प्रधानकर्मं अप्रधानकर्मं च विविच्य लिखत-**

नचिकेतः यमं वरं याचते I

**4. अधोदत्तं श्लोकं पठित्वा सूचनाः उपयुज्य गद्यक्रमं लिखत-**

ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन I
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति II

----------------- लुब्धेन ----------- विद्वेषयुक्तेन च ------------ अन्नं सम्यक् --------- I

**5. 'स्वयं पण्डितम्मन्यमानाः अज्ञाः कुपन्थानं प्राप्नुवन्ति '-इति आशययुक्तं श्लोकं चित्वा लिखत -**

| | |
|---|---|
| अविद्यायामन्तरे वर्तमानाः | यस्त्वविज्ञानवान्भव- |
| स्वयं धीराः पण्डितम्मन्यमानाः I | त्ययुक्तेन मनसा सदा I . |
| दन्द्रम्यमाणाः परियन्ति मूढा | तस्येन्द्रियाण्यवश्यानि |
| अन्धेनैव नीयमानाःयथान्धाः II | दुष्टाश्वा इव सारथेः II . |

**6. मातृकानुसारं वाक्यं परिवर्तयत-**

मातृका - गानालापनं समाप्तम् I जनाःकरघोषम् अकुर्वन् I

यदा गानालापनं समाप्तम् तदा जनाःकरघोषम् अकुर्वन् I

(क). सूर्यः अस्तं गतः I खगाः नीडं गच्छन्ति I

**7 . मातृकानुसारं सन्धिच्छेदं लिखत- 1x1 =1**

मातृका - उपेन्द्रः = उप + इन्द्रः

(क) तस्येन्द्रियम् = --------- + -------

**8 . उदाहरणानुसारं विग्रहवाक्यं लिखत- 1x1 = 1**

उदा - ससन्तोषम् = सन्तोषेण सह वर्तते I

(क) सविनयम् = --------------- I

**9 अधोदत्तं वाक्यं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि चित्वा लिखत- 3x1=3**

काकः जलपात्रस्य समीपम् आगत्य तस्मिन् अल्पमात्रं जलं दृष्ट्वा पाषाणखण्डानां निक्षेपणं कर्तुम् इच्छति स्म I

**10. प्रादेशिकभाषया विवर्त्तयत - 1x5=5**

शूद्रकः प्रसिद्धसंस्कृतनाटककारेषु अन्यतमः भवति I अस्य प्रसिद्धनाटकं भवति मृच्छकटिकम् I चारुदत्तवसन्तसेनयोः अनुपमप्रणयकथायाः सुन्दरं दृश्यं अस्मिन् द्रष्टुं शक्यतेI अत्र मुख्यरसः श्रृङ्गारः भवति I शूद्रकस्य शैली अतीवसरला भवति I

**11-13 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरं लिखत.- 2x4=8**

**11. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत.**

वाच्यस्त्वया मद्वचनात् स राजा
वह्नौ विशुद्धामपि यत्समक्षम् I
मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत्सदृशं कुलस्य II

क. अस्मिन् श्लोके क्रियापदं किम् ?

ख. श्लोके अग्नौ इत्यर्थकं पदं किम् ?

ग. कस्मात् स राजा वाच्यः ?

घ. रेखाङ्कितपदस्य सन्धिच्छेदं लिखत I

**12.खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत**

'कादम्बरी रसज्ञानामाहारोपि न रोचते' इति अभिज्ञवचनं कदम्बर्याः वैशिष्ट्यमवेदयति I महाकविबाणभट्टस्य कृतिः भवति कादम्बरी I उज्जयिन्यां प्रथितपराक्रमः तारापीडो नाम नृपतिरासीत् I तस्य विलासवती नाम महिषी I तयोः पुत्रःभवति चन्द्रापीडः I राजा चन्द्रापीडं प्राप्तयौवनं अभिषेक्तुं निरचिनोत् I तं च राजकुमारं विनीततरं कर्तुमिच्छन् शुकनासः उपदिशतिI

(क) कादम्बरीमधिकृत्य अभिज्ञवचनं किम् ?

(ख) राजा किं निरचिनोत् ?

(ग) खण्डिकायां राजा इत्यर्थे प्रयुक्तं पदं किम् ?

(घ) खण्डिकातः शतृप्रत्ययं पदं चित्वा लिखत ?

**.अधोदत्तां खण्डिकां पठित्वा सम्भाषणांशान् पूरयत-**

युनस्को संस्थया २००६तमे वर्षे कलारूपोयं अङ्गीकृतम् I आङ्गिक-वाचिक-आहार्य-सात्विक इति चतुर्विध अभिनयाश्च अत्र मिलति I अस्मिन् मिषाव् ,इटक्का, शङ्कः एतानि वाद्योपकरणानि उपयुज्यन्ते I

रामु -- नमस्ते गुरो ! कूटियाट्टं अधिकृत्य ज्ञातुम् इच्छामि I

अध्यापकः -- ............... ! पृच्छतु I

रामु -- कूटियाट्टं कदा विश्वपैतृककलारूपेण अङ्गीकृतम् I

अध्यापकः -- ...........................................................I

रामु -- कानि कानि वाद्योपकरणानि उपयुज्यन्ते ?

अध्यापकः -- .......................................................I

रामु -- तत्र चतुर्विधाभिनयोपि अस्ति किल I ते के ?

अध्यापकः -- आम् I ................................................I

रामु -- धन्यवादःI

**14-16 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरं लिखत- 2x4=8**

**14 सूचनानुसारं दुष्यन्तस्य स्वभावमधिकृत्य लिखत -**

अभिज्ञानशाकुन्तलम् --------विरहदुःखम्----------पुत्रदर्शनम्-------शकुन्तलादर्शनम्------प्रत्यभिज्ञानम् I

**15.सूचनाः उपयुज्य जीवनचरितं लिखत -**

नाम – कुमारनाशान् I

जन्म – १८९३ एप्रिल् १२ ,कायिक्कर ग्रामे I

प्रवृत्तिमण्डलः- कविः,सामाजिकः,तत्वज्ञानि,निरूपकः I

प्रधानकृतयः - वीणपूव्,प्ररोदनम्,नलिनी,करुणा,दुरवस्था I

मृतिः - १९२४ जनुवरि १६

**16. अधोदत्तेषु वेदाङ्गोपनिषदौ विविच्य पट्टिकां रचयत-**

निरुक्तम्,तैत्तिरीयम्,शिक्षा,ईशं,माण्डूक्यम् ,व्यकरणम्,छन्दःमुण्डकम्

*************************